International Journal of Sanskrit Research 2019; 5(4): 351-356

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(4): 351-356
© 2019 IJSR
www.anantaajournal.com
Received: 19-05-2019
Accepted: 23-06-2019

**Tirtha Halder**
M.A (Sanskrit), Jadavpur University, Kolkata, West Bengal, India

**Correspondence**
**Tirtha Halder**
M.A (Sanskrit), Jadavpur University, Kolkata, West Bengal, India

# ऋग्वेदे भक्तिभावयोरेका समीक्षात्मकालोचना

**Tirtha Halder**

## १. प्रस्तावना

ऋग्वेदः विश्वमानवानां चिरन्तनं ज्ञानभाण्डारमिति । भारतीयाणामैतिह्यं तथा विश्वसाहित्यसंस्कृतेश्च प्राचीणतमं जीवन्तनिदर्शणम्। ऋग्वेदे हि सभ्यमानवानां सामान्यचिन्तायाः विकाशः दृश्यन्ते। विश्वस्य प्रचीणतमं महाग्रन्थस्य तथा ऋग्वेदस्य मन्त्राः पद्यात्मकाः छन्दवद्धाश्चेति। पद्यात्मकमन्त्राणमयं कियदंशमतिरिच्य सर्वं सूक्तं हि प्रकृतिशक्तेः दैवीभावनयाः समृद्धाः। ऋग्वेदोक्तमन्त्राः स्तुतिप्रार्थनात्मकाश्चात्र स्तुत्यात्मकमन्त्रेभिः देवतानां नाम-रूप-कर्माणाञ्चोल्लेखनं स्यात्। प्रार्थनात्मकमन्त्रेभिश्च धन-आयु-शक्ति-पुत्रादिणां याच्ञा परिकीर्त्तिताः। अत्रैव हि ऋषिकविणां भक्तिभावयोरेकात्मकत्वं प्रतिष्ठितमित्याशयः। ऋषिकविणामपूर्वममृतमक्षयमव्ययञ्चानुभूतेरधिकांशदेवता कोऽपि प्रकृतिशक्तेः जीवन्तसत्त्वायामारोपिताः महिमानं प्रकाशं कृते शक्नुवन्ति। देवतानामयमारपिताः शक्तयः कदापि सौन्दर्यानन्देन कदापि च भयाल-विध्वंसी रूपेण ऋषिभिरुच्यन्ते। अर्थात् भावाद्भावान्तरं जायन्ते।

ऋग्वेदसंहितायाः प्रारम्भे सूक्ते अग्निदेवतां प्रति प्रार्थणया ऋषकविणां श्रद्धाभावोदयः दृश्यते। अन्तिमे सूक्ते तथा संज्ञाणसूक्तेऽपि राष्ट्रं प्रति ऐक्यभावः दृश्यते। तद् यथा -

"संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे सञ्जानाना उपासते।।" (१)

ऋग्वेदस्य १/११५, ३/६१, ५/८३, १०/८५, १०/१५६, १०/१६४ इत्यादयः सूक्तेषु भावरसानां प्रतिफलनं प्रतिविम्विताः भाषा-छन्द-अलंकार-रस-भावानां सौन्दर्येष्वणन्तमम्वुधिरिव प्रतिभाति। अर्थात् ऋषिभिरपि भावोदयः दृश्यन्ते । अमरात्मारविन्दाचार्यस्याभिमतानुसारतः ऋग्वेदः मानवात्मायारमृतोत्तरणस्य महागीतिकाव्यमिति।

**२. भाव**

**२.१ वैदिकी भावनायां भावः**

परमाचार्यः यास्कः विरचितः निरुक्तमिति ग्रन्थे चतुस्पदाणामन्यतममाख्यतस्य लक्षणप्रसङ्गे भाव शव्दस्योल्लेखं मिलति। तत्रोच्यते भावप्रघाणमाख्यतमिति । अर्थात् यत्र भावस्य प्राधान्यं सैव आख्यातम्। किन्तु भावविषये विशयस्य निरशनार्थे वृत्तिकारेण दुर्गाचार्येणोक्तम् -

"भावो भावना उत्पादना सा च असत्त्वभूतो धात्वर्थोऽत्र गृह्यते।"(२) इति

अपि चोक्तं वृत्तिकारेण -

"सः भावः प्रधानं यत्र गुणभूतानि चान्यानि कारणानि" (३) इति।

वैदिकी चिन्तया भाव शव्देन क्रियेति वुद्ध्यते। अर्थात् यत्र लिङ्गादिज्ञानानामप्रधाणरूपेण प्रतीती भवन्ति। आचार्यः स्कन्दस्वमीना भावः क्रिया इति। भावस्य क्रियाप्रतिपादनार्थञ्चोक्तञ्चाप्यन्यत्र-

"धात्वर्थो भावना सैवोत्पादना सैव च क्रिया" (४) इति।
"असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते" (५) इति च।

भावशव्दस्य पदार्थ-शव्दसमष्टिवाक्यं वा सत्तात्मेति च प्राप्यन्ते। यथा -

"भावशव्दं भवते स्वपदार्थे भवनं भाव इति।... इति परः प्रयुजमानः शव्दपदार्थकः।।" (६) इति

**२.२ लौकिकी मावनायां भावः**

"विभावैराहृतो योऽर्थस्त्वनुभावेन गम्यते।
वागङ्गसत्त्वाभिनयैः स भाव इति सङ्गितः।।" (७) इति

अर्थात् लौकिकी मावनया " वागङ्गसत्त्वोपेतान् काव्यार्थान् भावयन्तीति भावः" (८) इति ।भू धातोः भाव इति शव्दस्य निष्पन्नं भवति। भवन्तीति वा भावयन्तीति वा भावाः। रतिरूपेणात्र भावस्योत्पादनं भवन्ति पुणश्च पदार्थाणामास्वादनार्थे भावयन्ति। - "आस्वादनः कुर्वन्ति हृदयं व्याप्नुवन्ति" (९)। आचार्येण भरतमुनिना भावानां संख्या एकोनपञ्चाशदिति स्वीकृतवन्तः। तत्र त्रयस्त्रिंशत् सञ्चारिभावाः, अष्टस्थायिभावाः, अष्टसात्त्विकाश्चेति। - "एकोनपञ्चाशदिमे यथावद् भावास्त्रावस्था" (१०) इति । दशरूपकमिति च ग्रन्थेऽपि भावशव्दस्योल्लेखं प्राप्यते - " अन्यद् भावाश्रयं नृत्यम्" (११) इति

साहित्यदर्पणाकारेणाप्युक्तं यद् -
"सञ्चारिणः प्रधानानि देवादिविषया रतिः।
उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते।। " (१२) इति ।

रसाणामुत्पादकाः भावाः सदैवानन्दानुभूतिं भावयन्त्युत्पदयन्ति वा। यतः केवलं भावेन हि परमानन्दं प्राप्नोति ततः वेदे लोके च भाव ज्ञानं प्रयोजनमस्ति।

**३.भक्तिः**

**३.१ वैदिकी भावनायां भक्तिः**

वैदिकी निरुक्तमिति ग्रन्थस्य देवताध्याये भक्तिरिति प्रसङ्गमुक्तम् ।तत्र " भजनं भक्तिरिति" (१३) दुर्गाचार्यस्याभिमतम्। भज् विश्राणने अर्थात् भज् धातोः त्यगार्थेति । ततः येन सत्त्वया क्रियया पदार्थेण वा विविधदेवेभ्यः पृथक्त्वेन स्वरूपं प्रकाशते सैव भक्तिरिति। यथा इन्द्रभक्तिः -

"अन्तरिक्षलोकः माध्यन्दिनं सवनं ग्रीष्मस्त्रिष्टुप् "(१४) इति ।

अत्र अन्तरिक्षलोकः, माध्यन्दिनं सवनं, ग्रीष्मऋतुः, त्रिष्टुप् छन्दश्चेति इन्द्रस्याग्निदेवेभ्यः पृथककरणस्य हेतुः। अर्थात् अनेन विविधानां देवतानां सत्त्वां त्यक्त्वा इन्द्रदेवतायाः स्वमहिमा जायते। अत्र च भज् धातोः त्यागार्थः प्रतिपद्यते।

भज् सेवायाम् इत्यनेन च भज् धातोः सेवा भजनं वार्थेवापि भक्तिरिति सिद्ध्यति। तत्र भजनमिति ग्रहणेऽपि वैदिकी प्रयोगः दृश्यते। तद् यथा -

"लोकादीनामेवाग्न्यादिभिः भजनं भक्तिः" (१५) इति

अर्थात् सामान्यतः वैदिके भज् धातोः त्यागार्थ भजनार्थ वा प्रतीयते। तत्र विविधदेवतान् त्यक्त्वा प्रयोजनीयमिष्टदेवतां प्रति भजनमेव भक्तिरिति।

३.२ लौकिकी मावनायां भक्तिः

लौकिके लक्षणेति पदार्थवृत्ते नामान्तरेण भक्तिरिति गृह्यते। भज् धातोरन्तनिहितार्थेण हि लक्षणाया वोधः जातः। तत्र -

'भज् विश्राणने' - इत्यर्थे मुख्यार्थस्य त्यागं भवतीति भक्तिः।
'मज् आमर्दणे' - इत्यर्थे मुख्यार्थस्य भग्नं भवतीति भक्तिः।
'भज् सेवायाम्' - इत्यर्थे च मुख्यार्थस्य त्यागं भग्नं कृत्वा वा कोऽपि नवीनार्थभजनं भक्तिरिति।

यतः लक्षणायां मूख्यार्थस्य वाधं भग्नं त्यागं वा भवति, तद्योगे अर्थात् मुख्यार्थेण सह सम्वन्धयुक्ताऽऽरोपिता कोऽपि द्वितीयार्थस्य ग्रहणञ्च सेवां वा भवति। भक्तिः लक्षणा च पर्यायेति। अर्थात् भक्तिरिति लक्षणा। लक्षणायाः लक्षणं यत् -

"मुख्यार्थवाधे तद्योगे रुढितोऽथो प्रयोजनात् ।
अन्योऽर्थ लक्ष्यते यत् सा लक्षणारोपिता क्रिया।।" (१६) इति

अन्यत्रापि च -

"मुख्यार्थवाधे तद्युक्तो ययाऽन्योऽर्थः प्रतीयते ।
रूढे प्रयोजनाद्वासौ लक्षणशक्तिरर्पिता " (१७) इति

ध्वन्यालोकेति ग्रन्थस्य लोचनः टिप्पणीकारेण भक्तिप्रसङ्गेनोक्तं यत् - " गुणसमुदायवृत्तेः शव्दस्यार्थभाजस्तैक्ष्न्यादिर्भक्तिः "(१८) इति अर्थात् भज्यते सेव्यते पदार्थेण प्रसिद्धतयोत्प्रेक्षतेति भक्तिः।

४. ऋग्वेदः - भावभक्तिश्च

ऋग्वेदे अमृततत्वानामनन्तमक्षयसमृद्धिः सदैव विराजन्ते। तत्र चामृततत्त्वनाममृतत्वभावना प्रप्यन्ते विशिष्टोच्चैः मनत्रेभिः । ततः कुत्रापि ताडकोज्ज्वलगगणं कुत्रापि नायक-नायिकायाः प्रणयं परिणयं वा कुत्रापि च भयादिभावानामृषिरुद्घोषितः वाणीं वन्दे। ऋग्वेदस्य इमाः भावनाः कदाप्यालंकारेण कदापि च भावेन रसेण वेत्यलंकृताः। तत्र निदर्शनम् यथा -

"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरण्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ।।" (१९) इति

मन्त्रेऽस्मिन् पक्षीद्वयं वर्णितम् । तत्रैकः जीवात्मापरेकश्च परमात्मेति। जीवात्मा-परमात्मयोरेकत्वमत्र भावेन वोद्ध्यते। " पिप्पलं स्वाद्वत्त्येति " क्रियया भोगविलासी जीवात्मेति लक्ष्यते। एवमेव "अभिचाकशीति " इति क्रियया परमात्मायाः ज्ञानं जायते। अत्र भक्तिः प्रयोगोऽपि दृश्यते। यतः मन्त्रेऽस्मिनन् जीवात्मापरमात्मयोरेकत्वमित्याशयः भक्तिवलेन हि प्राप्यते। एवमेव ऋग्वेदार्णवे विराजन्ते भावमण्डितरत्नादिरिव मन्त्राणां समृद्धिः।

अपरेकमन्त्रे च प्रकृतेरारोपिता देवता पर्जन्यस्य विश्ववीध्वंसी भयंकररूपस्यापूर्वं प्रणाशं परिदृश्यते। रूपं यथा -

"वि वृक्षान् हन्ति उत हन्ति रक्षसो।
विश्व विभाय भूवनं महावधात्।।" (२०) इति

चित्रितमस्मिन् मन्त्रे लौकिकी भावनाया काव्यात्मकत्वम्। भयानकरसस्यानुभूत्यत्रेति ज्ञानं जायते। यतः भयानकरसस्य स्थायीभावः भयस्यनुमानमस्ति। यद्यप्यत्र भयानकरसस्यानुयोगः प्रत्यक्षेण न सञ्चरति।

ऋग्वेदस्यान्यतमं यम-यमी संवादसूक्तेऽपि लौकिकी भावधारा परिपुष्णाति ।अस्मिन् सूक्ते यम-यमी च सहोदरौ भ्रातामगिनी। सायणाचार्याणुसारतः यम-यमी च दिवा-रात्रयोः प्रतिकात्मकेति। अर्थात् तयोः सम्भोगेच्छा नास्ति युक्तम्, ततोऽप्यत्र यमं प्रति यम्याः प्रणयं तथा सम्भोगेच्छा परिदृश्यते। अत्र केवलमुपमालंकारेणालंकृत्वार्थमिमम् प्राप्नोति। किन्तु अत्र यदि अभिधावृत्तिना तथा वाचकेनार्थानुसन्धानं करोति ततः कामातुरा यम्याः सहदरभ्रातरं यमं प्रति सम्भोगं तथा रतिरूपः स्थायीभावस्य प्रतिविम्वितरूपमृषिकविणा दृश्यते। -

"उशन्ति धा ते अमृतास एतदेकस्य चित् त्यजसं मर्त्यस्य।
नि ते मानो मनसि धाय्यस्मे जन्युः पतिस्तन्वामा विविश्याः ।।" (२१) इति

अपि च -

"रात्रिभिरस्मा अहभिर्दशस्येत् सूर्यस्यचक्षुमुहुरुन्मिमीयात् ।
दिवा पृथिव्या सवन्धु यमीयमस्य विभृयादजामि।।" (२२) इति

यमी यमेन सहात्र सहवासमिच्छत्यत्र। तस्याः पुत्रोत्पत्तिरिच्छा कामसन्तप्तदशाश्च वर्णितः। अर्थात् अत्रापि च शृङ्गाररसस्य सम्भोगावस्थायां रतिरिति भावस्योत्पत्तिरिति भावः । यद्यप्यत्र न प्रत्यक्षेण रसस्योपस्थितिः। भावान्तरेणात्र च मानात्मकविप्रलम्भशृङ्गाररसस्योपस्थिरित्युत्पद्यते। यतः मा नेति वा मानः। अर्थात् नायकस्य नायिकाया वा माने तथा निषेधेऽपि नायिकाया नायकस्य वा मनसि सम्भोगेच्छा जातः। अत्रापि च यमस्य माने यम्याः रतिरूपभावः दृश्यते, अतः मानात्मकविप्रलम्भशृङ्गररसस्योपस्थितिरित्यपि सम्भवति।

ऋग्वेदस्थितः पुरुरवा-उर्वशीति संवादसूक्ते करूणरसस्यानुमानं भवति। तत्रापि च रसस्योल्लखं न स्फुटम् किन्तु तस्य स्थायीभावस्य शोकस्यानुमानमिति स्फुटम् तत्र च शंका-निर्वेद-चिन्ता-धृति-स्मृत्यादि व्यभिचारीभावोऽप्यभिवञ्जते । अर्थात् अत्र करूणरसस्योपरि शृङ्गारस्याभिवञ्जनमपि वज्यते। यथा -

"हये जाये मनसा तिष्ठ घोरे वचांसिमिश्रा कृणवावै नु न नौ मन्त्रा अनुदितामेते मयस्करन् परतरे च नाहृन्।।" (२३) इति

अस्य मन्त्रस्य सायणभाष्येऽपि नायकस्य पुरुरवस्य शोकरूपः स्थायीभावस्य विवरणं व्यभिचारिभावरूपेन लक्ष्यते । - " अस्माकं दुःखजनकत्वात् घोरकारिणि जाये मनसा अस्मदुपर्यनुरागवता मनसा युक्ता सती तिष्ठ क्षणमात्रं संनिधावेव निवस।।" (२४) इति

ऋग्वेदसंहितायाः विश्वामित्र-नदी संवादसूक्ते ईर्ष्यारूपः व्यभिचारिभावस्यानुमानमीयते –

" प्र पर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने।
गावेव शुभ्रे मातरा रिहाणे विपाट् छुतुद्री पयसा जवेते।।" (२५) इति

अत्र ' विषिते हासमाने ' इत्यनेन पदेन ईर्ष्यारूप व्यभिचारिभावस्याभिप्रायः वुद्ध्यते । सायणाचार्येणाप्युक्तम् - " विषिते मन्दुरातो विमुक्ते हासमाने अन्यन्योभावेन स्पर्धमाने । यद्वा हृष्यन्त्यावश्वे इव वडवे इव त्वरया गच्छन्तौ परस्परं हृष्यन्तौ "(२६) इति।

एवमेव ऋग्वेदार्णवे रत्नादिरिव विविधसूक्तस्य यथा सूर्यसूक्तस्य विवाहसूक्तस्यारण्यानीसूक्तस्य चापि मन्त्राणां रत्नज्योतिरूपः भावसौन्र्याणामानन्ददतत्वं चित्रितम् । ऋग्वेदस्य भावार्णवे च विशेषतः शोकोत्साहभयाश्चेति पुनः पुनः समुद्रतरङ्गमिव नित्यं प्रवहन्तीत्याशयः।

ऋग्वेदसंहितायां विविधानां मन्त्राणामर्थं न केवलं शव्दार्थेण शुद्धं सिद्धन्ति। तत्र च मूख्यार्थं त्यक्त्वा मूख्यार्थेण सह सम्वन्धयुक्तं कोऽपि द्वितीयप्रकारकमर्थं ग्रहणीयम्। तत्रोदाहरणं यत् -

"चत्वारि शृङ्गा त्रयो अस्य पादा।" (२७) इति

सायणाचार्याणुसारतः मन्त्रा यज्ञेन सह सम्वन्धयुक्ताः किन्तु चत्वारि शृङ्गाः प्रयुक्तेति कोऽपि यज्ञद्रव्यं नास्ति। अर्थात् शूद्धमन्त्रार्थस्य ग्रहने विघ्नं जातम्। तत्र च भक्तिवलेन मूख्यार्थं त्यक्त्वा लक्षितार्थेण मन्त्रार्थवोधे संशयः न जायते। अत्र चत्वारि शृङ्गा इत्यनेन चत्वारि पदजातानि, त्रयो अस्य पादा इत्यनेन भूत-भविष्यत्-वर्तमानाश्चेति कालग्रहणं भक्तिवलेन वोद्धव्यम् । अपरमेकमुदाहरणं यत् -

" सुदेव असि वरूण यस्यते सप्त सिन्धवः।
अनुक्षरन्ति काकुदं सूर्य्यं शुषिरामिव ।।" (२८) इति

अस्मिन् मन्त्रे सप्तसिन्धव इत्यस्य सप्तसिन्धुरिति ग्रहणे वाक्यार्थः स्पष्टरूपे न प्रतीयते किन्तु मूख्यार्थं भग्नं कृत्वा सप्तसिन्धव इत्यस्य पदस्यार्थः सप्तविभक्तिरिति ग्रहणे संशयः न जायते। पुनश्च काकुदमित्यनेन तालुरिति ग्रहणमपि भक्तिवलेन हि सिद्ध्यति। ऋग्वेदरतिरिच्यान्यत्रापि भक्तिः प्रयोगः परिदृश्यते । यथा -

"ओषधे त्रायस्वैनम्" (२९) इति
"स्वधिते मैनं हिंसी" (३०) इति च
"शृणोत ग्रावाणः" (३१) इति च

इत्यादयः मन्त्रांशे ओषधिः ग्रावाण वा कोऽपि न वक्तुं शक्नोति नापि शृण्वत् शक्नोति। यतः ग्रावाणः न शृणोति तथापि तस्य महिमाकीर्त्तणं भवत्यार्थात् इत्यादयः मन्त्रांशे शव्दग्रहणार्थे मूख्यार्थं त्यक्त्वा केवलं भक्तिवलेन प्रकृतार्थः लभ्यन्तेत्याशयः।

## ५. विश्लेषणम्

"रसो वै सः। रसं ह्येवायं लव्धानन्दी भवति।" (३२) इति

तैत्तिरीयोपनिषद्युक्तं परमात्मापरव्रह्मः रसरूपेणानन्दमयः। रसोऽयं लव्धानन्दयुक्तं भवति। शव्दः व्रह्मेति। अर्थात् आनन्दमयरूपेणानुभूयन्ते शव्दाः। यतः व्रह्मः रसस्वरूपः। सर्वेषां शव्दानां स्वात्मकत्वं प्रतिपादनार्थे तथास्वादनार्थे प्रयुक्तार्थाणामनुसरणं कर्त्तव्यम्। यद्यपि सर्वेषां समीपे शव्दः यथार्थेणार्थं न प्रस्तुयते। तत्र भक्तिभावयो भक्तिवलेन भावेन वा शव्दरूपः ब्रह्मणः परमात्मतत्वमास्वाद्यते।

वेदे सर्वत्र मनत्रस्थितः शव्दानामर्थाः स्वतन्त्रेण न वोद्ध्यन्ते। ऋषकविणां कन्ठोत्घोषितः वाणी किदृशी रूपेण प्रस्तरादेरन्तःस्वत्त्वया देवतातत्वं प्रतिविम्वितमिति ज्ञानार्थं भक्तिभावयोः प्रयोजनमस्ति। यत भावेन हि ऋषकविणामन्तरिन्द्रियाणामावेगः तथा करूणादेरनुभूतिरिति भावयन्तीति, भक्तिना च शव्दानामारोपितार्थः। विश्वसाहित्यवाङ्मये ऋग्वेदस्य भावसौन्दर्य्यरूपः रत्नानां समृद्धिरक्षयोऽव्ययश्च। प्रख्याता वेदगवेषिका गौडीधर्मपाल महोदया ऋग्वेदस्य काव्यात्मकभावसौन्दर्येण भक्तिभावयोरेकात्मकत्वं प्रतिष्ठितम्। अर्वाचीनवेदव्याख्याकारेण भाष्यकारेणापि वा ऋग्वेदस्य महागीतिमयतेति प्रसिद्ध्यति। अर्थात् संशयं विनोक्तम् यत् ऋग्वेद भक्तिभावयोरेकोऽम्वुधिरिव प्रतीयतेति भावः ।

## ६. अन्तःटिप्पणी

१. ऋग्वेदसंहिता १०/१९१/१
२.दुर्गवृत्तिः, निरूक्तम् १/३
३.दुर्गवृत्तिः, निरूक्तम् १/३
४.दुर्गवृत्तिः, निरूक्तम् १/३
५.दुर्गवृत्तिः, निरूक्तम् १/३
६.दुर्गवृत्तिः, निरूक्तम् १/३
७. नाट्यशास्त्रम् ७/१
८. अभिनवगुप्तः, अभिनवभारती टिप्पनी
९. अभिनवगुप्तः, अभिनवभारती टिप्पनी
१०. नाट्यशास्त्रम् ७/१०७
११. दशरूपकम् १/९
१२. साहित्यदर्पणः ३/२१७
१३.दुर्गवृत्तिः, निरूक्तम् ७/८
१४.निरूक्तम् ७/१०

१५. दुर्गवृत्तिः, निरूक्तम् ७/८
१६. काव्यप्रकाशः २/४
१७. साहित्यदर्पणः २/८
१८. लोचनः टिप्पणी, ध्वन्यालोकः
१९. ऋग्वेदसंहिता १/१६४/२०
२०. ऋग्वेदसंहिता ५/८३/२
२१. ऋग्वेदसंहिता १०/१०/३
२२. ऋग्वेदसंहिता १०/१०/७
२३. ऋग्वेदसंहिता १०/९५/१
२४. ऋग्वेदसंहिता १०/९५/१, सायणभाष्यम्
२५. ऋग्वेदसंहिता ३/३३/१
२६. ऋग्वेदसंहिता ३/३३/१, सायणभाष्यम्
२७. ऋग्वेदसंहिता ४/५८/३
२८. ऋग्वेदसंहिता ८/६१/१२
२९. तैत्तिरीयसंहिता १/२/१/१
३०. तैत्तिरीयसंहिता १/२/१/१
३१.तैत्तिरीयसंहिता १/३/१३/९
३२. तैत्तिरीयोपनिषद् २/७/१

**७. ग्रन्थपञ्जी**


1. युधिष्टिर गोप, *वैदिक साहित्येर इतिहास*, कोलकाता, २०१२
2. देवकुमार दास, *संस्कृत साहित्येर इतिहास*, कोलकाता, २०१२
3. भवानीप्रसाद भट्टाचार्य ओ तारकनाथ अधिकारी, *वैदिक संकलन* (प्रथम खण्ड), कोलकाता, २०१२
4. भवानीप्रसाद भट्टाचार्य ओ तारकनाथ अधिकारी, *वैदिक संकलन* (द्वितीय खण्ड), कोलकाता, २०१२
5. शुक्लासेन, *श्रौतपाठ*, कोलकाता, २०१४
6. डा जमुना पाठक एवं उमेश प्रसाद सिं, *नवीनवैदिकसञ्चयनम्*, वाराणसी, २०१०
7. *उपनिषद्*, गीताप्रेस, गोरक्षपुर, २०१५
8. शान्ति वन्ध्योपाध्याय, *ऋग्वेदभास्योपक्रमनिका*, कोलकाता, २०१०
9. उदयचन्द्र वन्ध्योपाध्याय, *निरुक्त*, कोलकाता, १४२१ (वङ्गाव्द)
10. तारकनाथ अधिकारी, *निरुक्त*, कोलकाता, २०१४
11. दण्डस्वामी आश्रम, *महाभाष्य* (पस्पशान्हिक), कोलकाता, १४१७(वङ्गाव्द)
12. ड. सुरेशचन्द्र वन्ध्योपाध्याय, *नाट्यशास्त्र*, कोलकाता,२०१६
13. अशोकनाथ शास्त्री, *रस ओ भाव*, कोलकाता, १४०५ (वङ्गाव्द)
14. रमानन्द आचार्य, *काव्यप्रकाश*, कोलकाता, १४२२ (वङ्गाव्द)
15. सत्यनारायन चक्रवर्ती, *ध्वन्यालोकः*, कोलकाता,२०१६
16. सत्यनारायन चक्रवर्ती, साहित्यदर्पणः, कोलकाता,२०१६